# .. Gurukavacham from KakalamAlinitantra ..

# ॥ ગુરુકવચં કઙ્કાલમાલિનીતન્ત્રે ॥

## Document Information

```
Text title : gurukavachaM kaNkAlamAlinItantre
File name : gurukavachaMkankAlamAlinItantra.itx
Category : kavacha
Location : doc_deities_misc
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : http://muktalib5.org
Proofread by : http://muktalib5.org, DPD
Description-comments : kaNkAlamAlinItantra
Latest update : August 16, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ ગુરુકવચં કઙ્કાલમાલિનીતન્ત્રે ॥

॥ અથ ગુરુકવચં કઙ્કાલમાલિનીતન્ત્રે ॥

દેવ્યુવાચ ॥
ભૂતનાથ ! મહાદેવ ! કવચં તસ્ય મે વદ ।
ગુરુદેવસ્ય દેવેશ ! સાક્ષાદ્બ્રહ્મસ્વરૂપિણઃ ॥ ૧॥

ઈશ્વર ઉવાચ ॥
અથા તે કથયામીશે ! કવચં મોક્ષદાયકમ્ ।
યસ્ય જ્ઞાનં વિના દેવિ ! ન સિદ્ધિર્ન ચ સદ્ગતિઃ ॥ ૨॥

બ્રહ્માદયોઽપિ ગિરિજે ! સર્વત્ર જયિનઃ સ્મૃતાઃ ।
અસ્ય પ્રસાદાત્ સકલા વેદાગમપુરઃસરાઃ ॥ ૩ ॥
કવચસ્યાસ્ય દેવેશિ ! ઋષિર્વિષ્ણુરુદાહૃતઃ ।
છન્દો વિરાડ્ દેવતા ચ ગુરુદેવઃ સ્વયં શિવઃ ॥ ૪॥
છતુર્વર્ગે જ્ઞાનમાર્ગે વિનિયોગઃ પ્રકીર્ત્તિતઃ ।
સહસ્રારે મહાપદ્મે કર્પૂરધવલો ગુરુઃ ॥ ૫॥

વામોરુસ્થિતશક્તિર્યઃ સર્વત્ર પરિરક્ષતુ ।
પરમાખ્યો ગુરુઃ પાતુ શિરસં મમ વલ્લભે ! ॥ ૬॥

પરાપરાખ્યો નાસાં મે પરમેષ્ઠી મુખં સદા ।
કણ્ઠં મમ સદા પાતુ પ્રહ્લાદાનન્દનાથકઃ ॥ ૭॥

બાહૂ દ્વૌ સનકાનન્દઃ કુમારાનન્દ એવ ચ ।
વશિષ્ઠાનન્દનાથશ્ચ હૃદયં પાતુ સર્વદા ॥ ૮॥
ક્રોધાનન્દઃ કટિં પાતુ સુખાનન્દઃ પદં મમ ।
ધ્યાનાનન્દશ્ચ સર્વાઙ્ગં બોધાનન્દશ્ચ કાનને ॥ ૯॥
સર્વત્ર ગુરવઃ પાન્તુ સર્વે ઈશ્વરરૂપિણઃ ।
ઇતિ તે કથિતં ભદ્રે ! કવચં પરમં શિવે ! ॥ ૧૦॥
ભક્તિહીને દુરાચારે દત્ત્વૈતન્મૃત્યુમાપ્નુયાત્ ॥
અસ્યૈવ પઠનાદ્દેવિ ! ધારણાત્શ્રવણાત્ પ્રિયે ! ॥ ૧૧॥
જાયતે મન્ત્રસિદ્ધિશ્ચ કિમન્યત્ કથયામિ તે ।
કણ્ઠે વા દક્ષિણે બાહૌ શિખાયાં વીરવન્દિતે ! ॥ ૧૨॥

ધારણાન્નાશયેત્ પાપં ગઙ્ગાયાં કલ્મષં યથા ।
ઇદં કવચમજ્ઞાત્વા યદિ મન્ત્રં જપેત્ પ્રિયે ! ॥ ૧૩ ॥
તત્ સર્વં નિષ્ફલં કૃત્વા ગુરુર્યાતિ સુનિશ્ચિતમ્ ।

શિવે રુષ્ટે ગુરુસ્ત્રાતા ગુરૌ રુષ્ટે ન કશ્ચન ॥ ૧૪॥
॥ ઇતિ કઙ્કાલમાલિનીતન્ત્રે ગુરુકવચં સમાપ્તમ્ ॥

http://muktalib5.org

Proofread byDPD

.. Gurukavacham from KakalamAlinitantra ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*